शास्त्रि प्रथम खण्डस्य कृते (साहित्यम्)
अभिज्ञानशाकुन्तलम् नाम नाटकस्य श्लोक व्याख्या ।

प्रथमाङ्कात् -

'सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥'

प्रस्तुतोऽयं श्लोकः 'पुरा कवीनां गणना' प्रसङ्गे कालिदासाधिष्ठितः, संस्कृत साहित्य शिरोमणिः विद्या मार्तण्डः महाकविना कालिदासेन विनिर्मितः विश्व प्रसिद्ध संस्कृत साहित्य लक्ष्यभूतः अभिज्ञान शाकुन्तलम् नामधेयस्य नाटकस्य प्रथमाङ्कात् उद्धृतोऽस्ति ।

प्रसङ्गेऽस्मिन् यदा सूत्रधारो नटीं परिषदः श्रुति-प्रमोद हेतु कथानिदर्शनार्थं गातुं कथयति, नटी गातुमृतुनिर्देशं कर्तुं सूत्रधारं कथयति । तदा सूत्रधारो ग्रीष्मर्तुमधिकृत्य शकुन्तलया ग्रीष्मवैशिष्ट्यं प्रतिपादयति ।

सुभगाः सलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः प्रच्छायसुलभ निद्रा दिवसाः परिणाम रमणीयाः भवन्तीति ।

सुभगाः = शोभनः सुखकरः सलिले = जले अवगाहनं = स्नानं येषु ते, पाटला = पुष्पविशेषस्तस्य संसर्गेण = सम्बन्धेन, सुरभिणः = सुगन्धिता वनस्य = अरण्यस्य वाताः = वायवो येषु ते, प्रकृष्ट छाया प्रच्छाया = सघनच्छाया तस्यां सुलभा = सुखेन लभ्या, निद्रा = स्वापो येषु ते दिवसाः परिणामे = अन्ते सायंकाले रमणीयाः = मनोहराः भवन्तीति ।

अत्र सर्वेषां विशेषणानां साभिप्रायात् परिकराऽलङ्कारः - 'उक्ति विशेषणैः साभिप्रायैः परिकरो मतः' इति लक्षणात् । ग्रीष्मस्य स्वभाववर्णनाच्च स्वभावोक्तिरलङ्कारः - 'स्वभावोक्तिर्दुरूहार्थस्वक्रिया रूपवर्णनम्' इति लक्षणात् । छन्दः आर्या - यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या इति ।

उपेन्द्र झा
26/7/20
एसो० प्रो० साहित्य
रा० उ० सं० महाविद्यालय
कुरसैला, पूर्णियाँ

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
अलङ्कार निवेचनम्
सा० द० दशमः परिच्छेदः

---

विभावना विशेषोक्तिरलङ्कारयोः लक्षणोदाहरणम् ।

विभावना- हेतुर्विना कार्यस्य उत्पत्तिः उच्यते तर्हि विभावनानामालङ्कारो भवति । उक्तं च साहित्य दर्पणे - 'विभावना विना हेतु कार्योत्पत्तिर्यदुच्यते ।' इति उदाहरणं यथा-

'अनायासकृशं मध्यमशङ्कतरले दृशौ ।
अभूषणमनोहारि वपुर्भाति मृगीदृशः ॥'

अत्र कारणं विना कार्योत्पत्ति कथनात् विभावना नामकालङ्कारः ।

विशेषोक्तिः- कारणे सत्यपि कार्यस्याभावो वर्ण्यते चेत्तदा विशेषोक्तिर्नामालङ्कारो भवति । उक्तं च साहित्य दर्पणे —

'सति हेतौ फलाभावे विशेषोक्तिः ।' इति उदाहरणं यथा-

'धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः ।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः ॥'

अत्र उन्माद कारणे धनित्वे सत्यपि उन्मादाभाव रूप कार्याभाव कथनात् विशेषोक्ति नामकालङ्कारोऽस्ति ।

---

उपेन्द्र झा
26/7/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
सुरकण्डा, धोलियाँ

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
वेणी संहार नाम नाटकस्य श्लोकं व्याख्या।

'निर्वाण वैर दहनाः प्रशमादरीणां,
नन्दन्तु पाण्डुतनयाः सह माधवेन।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च,
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः॥'

प्रस्तुतोऽयं श्लोकः भट्टनारायणकृत वेणी-संहारनाटकस्य प्रथमाङ्कात् उद्धृतः। अयं श्लोकः नान्द्याः अनन्तरं सूत्रधारेण प्रयुक्तः। वीररस प्रधानः वेणीसंहार नाटकस्य प्रथमाङ्के ... सूत्रधारः परिपार्श्वकेन सह ... भगवान् कृष्णः शान्तिं ... शत्रूणां नाशयति। अभिनयेन नाटयति।

अस्मिन् श्लोके प्रशमात् निर्वाणवैरदहनाः पाण्डुतनयाः माधवेन सह नन्दन्तु, रक्तप्रसाधितभुवः क्षतविग्रहाः च सभृत्याः कुरुराजसुताः स्वस्थाः भवन्तु।

अरीणाम् = रिपूणाम्। प्रशमात् = विनाशात्, निर्वाण वैर दहनाः = शान्तिमापन्नः वैरमेव दहनः शत्रुताग्निः येषां तथाविधाः। पाण्डुतनयाः = पाण्डुनृपस्य सुताः युधिष्ठिरादयः, भगवतो माधवेन सह = भगवतो वासुदेवेन (श्रीकृष्णेन) सार्धम्, नन्दन्तु = प्रसन्नाः भवन्तु। रक्तप्रसाधित भुवः, रक्तेन = रुधिरेण, प्रसाधिताः = अलंकृताः भुवः = भूमयः येषां ते। क्षत विग्रहाः = क्षतशरीराः। सभृत्याः = भृत्यैः सहिताः सभृत्याः अर्थात् परिवारजनैः। कुरुराजसुताः = धृतराष्ट्रस्य पुत्राः, दुर्योधनादयः स्वस्थाः = कुशलिनः, भवन्तु = सन्तु।

श्लोकेऽस्मिन् वसन्ततिलका वृत्तम्
तल्लक्षणं - 'उक्ता वसन्ततिलका तभजा जगौ गः'

इति

उपेन्द्र झा
26/7/20
एसो० प्रो० साहित्य
रा० उ० सं० महाविद्यालय
कुरसेला, कटिहार